This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

4081

नानाग्रंथालोकनात्तस्यचिंतनंजायतेऽस्खलितंस्यात्त
तोज्ञानेकस्मिन्कुर्वेव्यक्तोज्ञातकोऽन्यैश्चसर्वो॥४॥
विचित्रपात्रैःकरणाद्राणांश्रमंविनानुक्रमलेख
नार्थं॥समर्थमेतत्रकटार्थमेषाश्रयंतेतोनामय
थार्थमस्य॥५॥सन्मंगलाद्यैर्वचनान्वितानिपद्या
न्यत्रोद्यमेसमुदाहियंतेतान्यत्रपत्रीकरणप्रवीणा
श्रेयस्कराणिग्रथमंलिखेत्तुदासंडमंडलसंग्र
सारकलनेमौलिःस्थितोदोलनेनेत्रोन्मीलनमी
लनेरविरलश्रीकर्णलालक्रमेःसदानानिध्वनितै
र्विलासरचितैरध्वननोद्गजिन्निजीलानंदभरःक

KKSU LIBRARY
RAMTEK
441 106
M-1846-A
Dist. Nagpur

Acc. No. 4081 M-1846
Title - ज्ञानकाभरण (अंतिलेखन स्थगित)
Author - युधिष्ठिरज.
Date - ?
Sub - ज्योतिष.
folio - 20 available. (1st missing)
Xerox - (39.

M-1846-A

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

श्रीद्रुवदनोवःश्रेयसेकल्पतां॥७॥पुनःपुनर्मंगल
मूर्त्तिस्मरणंप्रत्यूहव्यूहनिवारणकारणमेवेति
पद्यांतरंनानादानेविधानेयज्ञानेकरेरत्नेस्त
कोभिश्चिरात्प्रोद्यत्कल्पतरोप्रकल्पितफलावासिः
कथंचिद्भवेत्पूर्णंयच्चरणांबुजस्मरणतःसं
पूर्णकामःपुमान्सोयंवोभिमतंददातुसततंहे
रंबकल्पद्रुमः॥८॥सन्मानसावासविलासहंसी
कर्णावतंसीकृतपद्मकोशाशोषद्रुषाभिमतं
विद्रुषोदद्यादिभाषाभवतांददातुगणाकल्याणा
नानिद्विरामणिःसुललितांकांतिंकलानांनिधिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्ष्मीस्थानतयोबुधश्चबुधतांजीवश्चिरंजीवि
तां॥सम्राज्यंभृगुजोर्कजोविजयतांराहुर्बहुक्षे
पतांकेतुर्यच्छतुतस्यवांछितमियंपत्रीयदीच्चात्त
मा॥१॥उपार्जितंयत्सदसिद्धिमिश्रंजन्मांतरेक
र्मनरेरिदानीं॥होरागमस्तस्यविपाकमुच्चैर्दृग्
क्रमेणप्रकटीकरोति॥२॥साक्षाद्ध्वेद्वाक्यनिरी
क्षणायसुनिर्मलादर्शतलंकिलेदं॥शास्त्रेवियद्ग
रिनिधिंप्रकर्त्तुंनक्षिप्तथार्थीजनयानमित्रं॥३॥
आधानकालेकमलोद्भवेनवर्णावलीभिर्लललांतरा
ले॥याकल्पितापश्यतिदैवचिंतांहोरागमज्ञान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विलोचनेनः॥१३॥होरागमोव्योम चरोनुसारस्तेषां
विचारःसुतरामुदारः॥सिध्यंतरवाकलनंकिलस्या
भ्यासोयदिस्याद्गणिनहृदस्य॥१४॥आपारहो
रागमपारगामिपाठ्यांचबीजेसुतरांप्रगल्भ्यः॥
सद्गोलविद्याकुशलःसएवभवेत्फलादेशविधौस
मर्थः॥१५॥श्रीजन्मपत्रीशुभदीपकेनव्यक्तंभवेद्गो
विफलंसमग्रंशुभाप्रदीपेनयथालयस्थघटादि
ज्ञानंप्रकटत्वमेति॥१६॥सोजन्मपत्रीविमलानय
स्यतज्ज्ञोचित्तंसततंधकंस्यात्॥७अनल्पमल्पं
चतत्तोल्पकंवानकल्पतेभाग्यमितीवहेतोः॥१७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मकालतिथिवारनारकाश्चापियोगकरणक्षणा
भिधाः॥ मंगलायकिलसंतुपत्रिका यस्यशास्त्रविहि
तांविरच्यते॥१८॥ येवक्ष्यमाणाइहराजयोगास्तेसि
द्धभूताइहनाभसाश्चयेकारकापूर्णफलंहितूर्णं
यच्छंतुपत्रिकीयतेयत्नियात्॥१९॥ यस्योमलेयंकिल
जन्मपत्रिकातुहलेनक्रियतेयथोक्त्याततस्यालये
सत्कमलासलीलंसुस्थिलातिष्ठतुदीर्घकालं॥२०॥
अथसत्तिलिकोक्तसंवत्सरादिफलानितत्रादेसंच
सरफलं॥ सजयतिसिंदुरवदनोदेवोयत्सादरंकज
स्मरणंवासमणिरिवतमसांराशिनाशायतिवि

नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ्राणं ॥१॥ कल्याणं कमलासनोत्र भगवान्विष्णुः स
विष्णुः श्रियं ॥ प्रालेयाद्रिसुतापतिः सविनयं ज्ञानं
चनिर्विघ्नतां ॥ चंद्रशास्फुडिदर्कभोमधिषणछा
यासुतेरन्वितं ज्योतिश्चक्रमिदं सदैव भवतामायुः
श्रियं यछतु ॥२॥ अतिमृदुलकराग्रे कुंकुमाभैर्
दंशैरदभ्रिस्वरश्रृंगस्वर्णसिंहासनस्थः ॥ नवच
नकुचभारंदिग्वधूनांविलुंपन्जयतिकिरणमा
लीपग्रहस्तः प्रसन्नः ॥३॥ सारदाभारदनीरदा
भाविभात्रिभानोरिवभानुभागन् ॥ निवारयंतीनि
शांतमित्रमज्ञानपर्यायमवार्यमार्या ॥४॥ पद्मासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खलुनेत्रामंचतमसंविध्वंसमेतिरणाच्चंद्रोनित
धांबुजोलकमयान्एसाछिद्यंतिचायोविश्वोद्भव
संस्थितिप्रलयहेन्निसंपरंयोगिनोद्राग्वाचंप्रकटी
करोतिभगवान्त्रैलोक्यदीपोरविः॥५॥अमरीकम
रीभारभ्रमरीमुखरीकृतंदूरिकरोतुदुरितंमोरी
चरणपंकजंपद्मागजाननायमहसेप्रसूहमितिरुचि
रंअपारकरुणापूरतरंगितदृशेनमः॥७॥अप्रदी
पायधारात्रिरनादियंयथानभः॥तमसोवस्तरारा
जाभमस्यधडुवाध्वनिः॥८॥नरात्सहस्त्रकरिणांवा
जिनांवचनुर्गणं॥करोतिदेवाकालज्ञोयदेकोदेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

चिंतक:॥९॥तस्माद्राजाधिगंतव्योनहुसांवत्सरोग्र
णी:॥१०॥जयंयश:श्रियोभोगान्श्रेयश्चसममीप्सितं॥११॥
सूर्य:पंकजपालिरिंदुरमलज्योतिस्तुपूर्णानलो भौमः
शक्तिधरोबुधोधनुर्धानानुरकोगुरु:॥१२॥शुक्रो
जापरतोथदंडसहित:सौरिस्तमोभीषण:केतु:स्व
ड्डधरोभवंतुनवमेनिशेप्रसन्नायहा:॥१३॥हृतेमया
नोदकयंत्रधारणंनभेषणंचापिनरंकुधारणं॥१४॥परो
पिष्टोसमयाहिलिख्यतेशुभाशुभंजन्मफलंनरा
णां॥१५॥स्वस्तिश्रीसौख्यरात्रीशुभफलजननीतुष्टि
पुष्टिंप्रदात्रींमांगल्योत्साहकर्त्रीगतभवसदसक

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेणांच्यंजयंत्री॥नानासंपद्विधात्रीधनकुलयत्रासा
मायुषांवर्धयंत्रीरिष्टापद्विघ्नहंत्रीगुणगणवसतिर्लि
ख्यतेजन्मपत्री॥१॥तत्रतावत्संवत्सरफलम्॥सर्व
वस्तुपरिसंग्रहरतःपुत्रसंततिरतीवसंततिः॥सर्वभो
गयुतदीर्घजीवितोजायतेप्रभवसंभवःपुमान्॥१॥
उत्पन्नभोक्ताप्रियदर्शनश्चबलाधिकालीचतुरःक
लाज्ञः॥राजाभवेदात्मकुलेसुशीलोविद्वान्मनुष्यो
विभवाब्दजन्मा॥२॥सदासहर्षोतितरामुदारःसमु
त्रतरोविभवैःसमेतः॥सद्भाग्यविद्याविनयोपप
न्नोनूनंपुमान्शुक्रसमुद्भवःस्यात्॥३॥दातासदानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दयुतोन्तिकांतःसखेननिश्चेसहितोगुणीस्यात्॥८॥दृष्ट्वश्च
धूर्तोपरकार्यकर्तोग्रमोदजन्मामनुजोभिमानि॥८५
ज्ञानाभिमानःसुतरांदयालुःकुलानुरक्तःकिलचार
शीलः॥८६॥देवद्विजार्चानुरतोविनीतोमर्त्यःप्रजाधीश्व
समुद्भवःस्यात्॥८५॥कांतःसुखीभोगयुतःश्रमानी
प्रियप्रवक्ताबहुपुत्रयुक्तः॥सुगुप्तबुद्धेःखलुदीर्घजी
वीनरोंगिरोवत्सरसंभवःस्यात्॥८८॥श्रीमान्प्रतापी
बहुशास्त्रवेत्तासुहृत्प्रियश्चारुमतिर्बलीयान्॥सकी
र्तिकोतितरामुतस्तेभवेन्नरःश्रीमुख जातजन्मा॥
७॥प्रत्रस्तचेताःसुतरांयशस्वीगुणान्वितोरत्नरतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनीतः॥सदा सहर्षोभिमतोबहूनां भावोभिधानो
ध्रुवमानवः स्यात्॥८॥प्रसन्नमूर्त्तिर्गुणवान्विनीतः
श्रुतश्चदानाभिरतोनितांतं॥सुधीश्चिरायुर्दृढदेह
शालीजातोयुवाब्देपुरुषःसदेवा॥९॥सर्वलोकगुण
गौरवयुक्तःसुदरोध्यतिरंगुरभक्तः॥क्रीत्यशास्त्र
कुशलश्चसुशीलोधातृवत्सरभवोहिनरःस्यात्॥१०॥
तत्कालसंजातमहत्प्रकोपहर्षाभियुक्तोगुणवान्प्रतापी॥१॥
दक्षःकलाकोविदलक्षणाभिज्ञालिमत्सौभवेदीश्वर
वर्षजन्मा॥१२॥व्यापारदक्षःक्षितिपालमानीदानाभि
मानीननुशास्त्रवेत्ता॥बहुप्रकारैर्बहुधान्यवित्तःस्या

K K S U LIBRARY
RAMTEK
441 106
M-1846
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानवोवैबहुधान्यजन्मा॥१२॥रथध्वजेछत्रतुरंगमा
द्यैर्युतश्चशास्त्राभिरतोरिहंता॥मंत्रीनरेंद्रस्यनरश्चत
श्चःप्रमाथिसंवत्सरसंभवःस्यात्॥१३॥उच्चैःक्रमकर्मा
भिरतिर्न्निनांतमरातिचक्राक्रमणेनिदक्षः॥१४॥
धीरोनिनरामुदारःपराक्रमीविक्रमवर्षजन्मा॥१४॥
कार्यप्रलापीकिलनिंद्यशीलस्वलानुतापःपरकर्मक
र्त्ता॥भर्त्ताबहूनांमलिनोलसश्चजातोद्यषाढेमनुजो
तिलुब्धः॥१५॥चित्रवस्त्रकुसुमैकमानसोमानसोद्भव
चयान्वितःसदा॥चारुशीलविलसत्कलान्वितःश्वित्र
भानुजननोहिपूरुषः॥१६॥अरालकेशःसरलःसुकां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्जितारिपक्षोमतिमान्विनीतः॥प्रसन्नमूर्त्तिर्विलसद्विभतिःसुभानुसंवत्सरजोनरःस्यात्॥१७॥
धूर्त्तश्चशूरश्चपटुःकलाज्ञःसुनिष्ठुरोगर्हितकर्मकर्त्ता॥उत्सन्नभोक्ताद्रविणेनमुक्तःस्यात्तारणाद्रोद्भवमानवोयः॥१८॥स्वधर्मकर्मभिरतोनितान्तमछाद्यपारंगमतामुपेतः॥कलाकलापेकुशलोविलासीयःपार्थिवाद्येकुलपार्थिवःस्यात्॥१९॥सोरव्यातिरिक्तोव्यसनाभिभूतोभीतोनकिंचिद्रणादणस्यात्॥ज्ञातःपुमानस्थिरचित्तवृत्तिर्व्ययाभिधानेव्ययकर्मशीलः॥२०॥रा
जगोरवमहोत्सवःशुचिर्मानवःपृथुतनुर्महामतिः॥

वैरिबंधुविजयोद्यतः सदा सर्वजिच्छरदियस्य संभवः॥
२॥ भूरिभोगबहुभक्ष्यसंयुतः सुंदरश्च मधुरान्नभुक्
सदा॥ धीरतागुणयुतोऽतिधारणः सर्वधारिणि चयस्य
दे संभवः॥३॥ वक्त्रकोविदगतचित्तवित्तिः कुटुंबसोख्या
पचयोऽतिधूर्त्तः॥ जनेन साकं गतचित्तशुद्धिर्विरोधि
वर्षप्रभवो नरः स्यात्॥४॥ निर्घृणः किल कराल लोग
लोदीर्घपर्वबहुगर्वसंयुतः॥ चारबुद्धिरहितोऽप्यहो
हृद्यमानवोविकृतवर्षसंभवः॥५॥ कामातुरो धूसरका
यकांतिः कठोरदीर्घस्वरफल्गुवाक्यः॥ क्रूरोचलज्ञा
विधिवर्जितस्त्यानरः खराब्दप्रभवोऽतिदीर्घः॥६॥ नडा

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गवापीगृहकूपकर्त्रीसदान्नदानाभिरुचिःशुचिःस्या
त्पुंश्चिलासिनीनंदनजातहर्षोनरोभवेन्नंदनहर्षजन्मा॥२३॥संग्रामधीरःसुतरांसुशीलोभूपालमान्योवदतांवरेण्यः॥दातादयालुःकिलवैरिहंतायस्यप्रसूतिर्विजयाभिधानेः॥२४॥शास्त्रप्रसंगेविदुषांविवादेमान्योवदान्योरिपुवर्गहंता॥जायाविलासीविषयातुरःकोजातोजयोद्वेविजयोमहोजः॥२८॥भूषाविशेषैःसहितश्चयोषाविलासस्त्रीलोलनेवाकुलाशः॥सशीलरत्याभिरतिश्चभोक्तायोनन्मथाब्देजननेप्रपन्नः॥२९॥क्रूरोद्वतोनिंद्यमतिश्चलुब्धोवक्तास्यबाह्वंघ्रिरधप्रियः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यात्॥चिरङ्भाषीबहुदुष्टचेष्टोयोहायनेदुर्मुखनाम्नि
जातः॥२०॥तुरंगहेमांबरधान्यरत्नैर्युतोनितांतंसुतदा
रसोख्यः॥समस्तवस्तुग्रहणैकबुद्धिर्योहेमलंबेपुरुषः
प्रजातः॥२१॥धूर्तोनितिलुब्धोलसतांप्रपन्नःश्लेष्माधि
कस्तत्वविवर्जितश्च॥प्रारब्धकार्यंनितरांप्रलापीवि
लंबसंवत्सरसंभवःस्यात्॥२२॥दुराग्रहीसर्वकला
प्रवीणःसुसंचकश्चंचलधीश्चधूर्तः॥अनल्पजल्पः
स्वसुहृद्विकल्पोविकारिसंवत्सरजोनरःस्यात्॥२३॥
वणिक्क्रियायांकुशलोविलासीनेतानुकूलश्चसुहृज्जो
नानांगअनेकविद्याभ्यसनानुरक्तःसंवत्सरेशार्वरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाम्निजातः॥२४॥कामीप्रकामंधनवांश्चत्राश्चसेवार
रोदारहृतार्थतनः॥सुगुप्तबुद्धिश्चपलःस्वभावःपूवा
भिधाद्देप्रभवोनरःस्यात्॥२५॥सोभाग्यविद्याविनयैः
समेतःपुष्पेयरगण्येरपिदीर्घजीवी॥स्यान्मानवःसूनुध
रेसंपद्यस्यप्रसूतिःशुभरक्षमासु॥२६॥यःसर्वत
श्चारुगुणोदयालुसत्कर्मकर्त्राविजयीविरोषात्॥को
लोविनीतशुभदृक्प्रवीणोयःस्योभद्रद्रुसरसंभवःस्या
त्॥२७॥क्रूरेणदृष्टेःक्रूररत्नस्वभावःस्त्रीवल्लभःपर्वतनुत्य
गर्वः॥स्यादंतरायःपरकार्यकालेक्रोधीभवेत्क्रोधिनिय
म्यजन्मा॥२८॥सत्पुत्रदारोन्नितरामुदारोभवेन्नरोधीश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुरोविरोषात्॥विश्वावसुस्यन्नइतिप्रविष्टोमिष्टान्नभुक्
श्रेष्ठगुणैःसमेतः॥९॥धनस्यधान्यस्यचनैवकिंचित्सु
संग्रहोयंतकठोरवाक्यः॥आचारहीनःपरुषत्वयुक्तः
पराभवेयस्यनरस्यसूतिः॥८॥भवेदलंचंचलचित्त
शक्तिरसत्प्रसूतिःखलुसाधुदृश्यैःधूर्तैःसदाचारवि
चारहीनःप्लवंगजोवेमनुजःसशोभः॥७॥स्योन्मध्य
रूपःप्रियवाक्कृशधालुर्जलाभिलाषीचनुवेलमेव॥
स्थूलांघ्रिसन्मौलिरलंबलीयान्किलारिकीलःकिलके
प्रसन्नः॥६॥पंडितोहिधनवान्बहुभोगीदवतातिथि
रुचिःशुचिरुच्चैः॥सात्विकःसतांकलेवरयष्टिःसोम्यव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्सरभवस्तुनरःस्यात्॥४७॥इतस्ततःसंचलनानुरक्तो
लिपिक्रियायांकुशलोविवेकी॥क्रोधीशुचिर्भोगनिचेत
चेताःप्राणीतिसाधारणजःप्रणीतः॥४८॥महेश्वराराध
नतत्परःस्यात्क्रोधीविरोधीसततंबहूनांपराङ्मुखःस्मी
तवत्कोविरोधीविरोधद्भन्नाम्नीचयस्यजन्मा॥४९॥चि
द्भान्सुशीलोचकलाप्रवीणःसुधीश्चमान्योवसुधाधि
पस्य॥व्यापारसंप्राप्तमहस्रतिष्ठःपुमान्भवेद्दुपरिधा
विजन्मा॥५०॥दुष्टाभिमानीकलहानुरक्तोलुब्धःकुटुं
बाभिरतोविवादी॥स्यादल्पधीर्गर्हितकर्मकर्त्रीप्रमा
दिजन्मामनुजःप्रमादी॥५१॥स्याद्भूरिदारश्चतुरोलिद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टः श्राश्वसुतानंदभरप्रपूर्णः॥१॥ज्ञातज्ञः सुतरांवि
नीतोप्यानंदजातोमनुजोवदान्यः॥२॥स्याक्रूरकर्मी
कलहानुरक्तः संत्यक्तसत्कर्मविचारसारः॥३॥इत्याविधा
नस्त्वतिसाहसोपिभवेन्नरोराक्षसवर्षजातः॥४॥स
द्बुद्धिशालीजलसस्यपद्मणिक्रियायोकुशलः सुधी
लः॥५॥स्यादल्पचिन्तोबहुपालकश्चजातोनलाब्देचप.
लोमनुष्यः॥६॥पिशेषणोगर्हितकर्मकर्त्तास्यादुद्धत
श्चंचलवेभवाढ्यः॥७॥रागीषठोग्रंतकठोरवाक्यायःपिं
गलाब्देकिलजातजन्मा॥८॥अनल्पजल्पःप्रियता
मुपेतस्त्वसाधुबुद्धिर्विधिनावियुक्तः॥९॥कलिप्रसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैकिलकालरूपोयःकालयुक्तप्रभवःसुरागः॥५२॥
उदारचेताविलसत्प्रसादोरणांगणप्राप्तयशाःसुवे
षः॥नरेंद्रमंत्रीबहुपूजितार्थीसिद्धार्थिजातोमनु
जःसमर्थः॥५३॥भयःप्रदःपालयितापशूनांश्च
सरीवादपरोनिधूर्त्तः॥जातापकीर्त्तिःखलुचित्त
शक्तिर्नरोनिरीद्रः खलुरौद्रजन्मा॥५४॥स्ववाक्य
निर्वाहमहाभिमानःप्रसन्नताहीनतरोनरःस्यात्॥
कामीप्रकामंदुरितःप्रवृत्तियोदुर्मतिदुर्मतिवर्षजातः
॥५५॥नियोनरंद्रारगौरवःस्याद्गजाश्वभूरुहसम
न्वितश्चातौर्यत्रिकप्रीतिरतीवजातश्चेन्मानवोदु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुभिन्नाक्षिजातः ॥५६॥ उदारक्षः क्वचिदपि महाका
मलाघामयानांप्रादुर्भावादतिदृढाननुजायतेयत्त
रोषः ॥ पापाद्दंडे भवतिकुनखीहस्तयुग्मेथवास्याच्छ
स्त्रादुःखंचजतिरधिरोद्गारिजन्मामनुष्यः ॥५७॥ओ
चारधर्माभिरतोनितांतमनोभवोत्कर्षभरोनरः स्यात् ॥
अन्याधिकत्वंसहतेचकिंचिद्रक्ताक्षिजानोश्शिरजा
न्वितश्च ॥५८॥ स्यादंतरायोहिपरस्यकार्यंतमोगुणा
धिक्यभयंकरश्चापरस्यबुद्धिंप्रहरेत्प्रकामंयोहाय
नेक्रोधननाम्नि जातः ॥५९॥ उपार्जितार्थंव्ययतन्नि
तांतसेवारतोनिष्ठुरचित्तरक्तिः ॥ सत्कर्मलाल्पत्वमनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवृत्तिः स्वयाभिधाने जननंहियस्य ॥ ७ ॥ इतिश्रीदुंढि
राजजोतिर्विविरचिते जातकाभरणे संवत्सरफलंय ५
श्चत्प्रसन्नोननुस्वनुकांतासंतोषयुक्तोतिरांचिरा
युः ॥ नरः सदाचारपरोप्युदारोधीरश्चसोम्यायनजा
तजन्मा ॥ १ ॥ अरवर्वगर्वैः सविकर्मकर्त्ताचतुष्पदाढ्यो
त्तिकठोरचित्तः ॥ धूर्त्तोप्यसह्योननुमानवानंयाम्या
यनेवेजननंप्रपन्नः ॥ २ ॥ रूपवानुणवांश्चैवनानाव्या
पारसंयुतः ॥ रक्तोत्तिग्रामवर्णश्चजायतेदक्षिणायने ॥
३ ॥ इत्ययनफलं ॥ कंदर्पसूपोमतिमान्प्रतापीसंगीतशा
स्त्रेगणितेप्रवीणः ॥ शास्त्रश्रवक्तामलचैलचेतावस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तजातोमनुजः प्रसन्नः॥१॥ऐश्वर्यविद्याधनधान्ययु
क्तोबलप्रतापान्वितकोशपालः॥२॥भोगीभवेन्नीरविहा
रशीलोयोग्रीष्मकालोद्भवतापपन्नः॥३॥संग्रामधी
रोमतिमान्प्रतापीतुरंगमप्रेमकरः सुरूपः॥४॥फाल्गुनि
लात्मालननाविलासीवर्षोद्भवःस्यात्पुरुषःसहर्षः॥५॥
अपूर्णरोषःपुरुषोनिलात्मासानिधनीधर्मरुचिःशु
चिःस्यात्॥६॥रणप्रियोवाहनसंयुतश्चनरःशरन्नाभि
जतोप्रजातः॥७॥नरेंद्रमंत्रीचतुरोप्युदारोनरोभवे
च्छरद्गुणोपपन्नः॥८॥सत्कर्मधर्मानुरतोमनस्वीहेमं
तजातःसततंविनीतः॥९॥मिष्टान्नपानानुरतोविनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नःक्षुधान्वितःपुत्रकलत्रसौख्यः॥सत्कर्मवेषःपुरुषः
सरोषःसत्साधित्रालीत्रिरोद्भवःस्यात्॥६॥इतिअ
नुफलं॥सत्कर्मविद्याविनयैरुपेतोभोगीनरःस्यान्म
धुरान्नभोक्ता॥सपात्रमित्रानुरक्तश्चमंत्रीचेत्रोद्भवोय
स्तुचित्रमंत्रः॥१॥सुलक्षणःपुण्यगुणाभिरामःपु
मान्बलीयान्द्विजदेवभक्तः॥कामीचिरायुर्जलपानै नमांन
शीलःस्यान्मानवोमाधवज्ञातसौख्यः॥२॥क्षमान्वित
श्चंचलचित्तशक्तिर्विदग्धदासाभिरुचिश्चनीत्रः॥चिचि
त्रबुद्धिःखलुदीर्घसूत्रश्रेष्ठाभवेज्ज्येष्ठशुभोमनुष्यः॥३॥
बहुव्ययोनल्पव-चोविलासःप्रमादनीलोगुरुवत्सल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्च॥सदाग्निमांद्यःशुभकर्मरस्यादाषाढजोगूढनरा
भिमानः॥४॥पुत्रैश्चपौत्रैश्चकलत्रमित्रैसुखीचतान
स्यनिदेवाकत्तौ॥लोकप्रसिद्धःकफवान्चदान्योगुणा
न्वितःश्रावणजातजन्मा॥५॥श्रीमान्भवेत्क्षीणकले
वरश्चदातासुचकांतासुतजातसौख्यः॥सुखेचदुःखेवि
तोहिमर्योभद्रस्तथाभाद्रपदातजन्मा॥६॥विद्वान्धे
नीराजकुलप्रियश्चसत्काव्यकर्त्तावहुभृत्ययुक्तः॥दाता
गुणज्ञोबहुपुत्रसंपन्नरोभवेदाश्विनजोश्वनाथः॥७॥स
त्कर्मकर्त्तावहुवाग्विलासोधनान्वितःसंकुचिताऽकश्च॥
कामंसकामःक्रयविक्रयार्थीसत्क्षत्रकार्त्तिकलब्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मा॥८॥सत्तीर्थसत्राभिरतः सुशीलः कलाकलापे
कुशलोविलासी॥परोपकारीधतसाधुमार्गोमार्गेऽ
वः सद्भिभवैः समेतः॥९॥परोपकारीचिरवित्तहीनः क
ष्टार्जितार्थव्ययदद्धिधिरः॥सुगुप्तमंत्रः श्रुतशास्त्र
सुसंगः यत्नः पोषविद्वेषासुरषः दँशाँगैः॥१०॥सम्मंत्रविद्यादि
कसाधुयोगोयोगोक्तविद्याभ्यसनानुरक्तः॥बुद्धिर्वि
द्वेषान्मिहतारिसंघोमाघोद्भवःस्यदनघोमनुष्यः॥११
परोपकारीकुशलोदयालुर्बलान्वितःकोमलकामशा
लीविलासिनीकेलिविलासशीलोयःफाल्गुणेफल्गु
वचोविद्वेषः॥१२॥इतिमासफलंचचिरायुःसुतरां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुशीलःस्त्रीपुत्रयुक्तोमलकायवाली॥सदासहानंदवि
नीतकालःस्याज्जन्मकालस्तुबलर्क्षपक्षे॥१॥प्रलाप
शीलोविबलश्चलोलःकलिप्रियस्वीयपराङ्मुखश्च॥म
नोभवाधिक्ययुतोनितांतंसितेतरेयस्यनरस्यजन्मा॥
२॥इतिपक्षफलानि॥बहुजनपरिवारश्चारुविद्योविवे
कीकनकमणिविभूषावेषवाचालीसुशीलः॥अतिसुल
लितकांतिर्भूमिपालोसवित्तःप्रतिपदियदिस्तनिर्जोय
तेयस्यजंतोः॥१॥दानोदयालुर्गुणवानयत्नास्वीसुसं
गतिःसारविचारधन्यः॥प्रसन्नमूर्त्तिर्बहुगीतकीर्त्ति
र्मैत्र्योद्वितीयातिथिसंभवःस्यात्॥२॥कामाधिकःस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दनवद्यविद्योबलान्वितोराज्यकुलाप्तवित्तः॥प्रवास
शीलश्चतुरोविलासीमर्त्यस्तृतीयाप्रभवोभिमानी॥३
ऋणप्रदात्तिर्बहुसाहसःस्याद्व्रणप्रवीणःकृपणःस्वभा
वः॥घृतानुरक्तश्चतुरोमनुष्यावादीयदिस्याज्जनने
चतुर्थी॥४॥संपूर्णगात्रश्चकलत्रपुत्रमित्रान्वितोभू
तदयान्वितश्च॥नरेंद्रमान्यश्चनरोवदान्यप्रसूतिकाले
यदिपंचमीस्यात्॥५॥सद्यप्रतिज्ञोधनसूनुसंपद्दीर्घो
रुजानुर्मनुजोमहोजाः॥प्रकृष्टकीर्त्तिश्चतुरोवसिष्ठः
षष्ठ्यांप्रजातोव्रणकीर्णगात्रः॥६॥ज्ञानीगुणज्ञोहिवि
शालनेत्रःसप्तम्यांरेवार्चनचित्तवृत्तिः॥कन्याजने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तापरिचन्द्रनास्यात्सप्तमीजोमनुजोरिहंता॥७॥नाना
संपत्सूनुसौख्यः कृपालुः पृथ्वीपालः प्राप्तविज्ञाधिका
रः॥कांताप्रीतिश्चंचलश्चित्तवत्तिर्यस्याष्टम्यां जन्म
चेन्मानवस्य॥८॥पराङ्मुखोबंधुजनस्यकार्येकठोर
वाक्यश्चसुधीर्विरोधी॥सदासदाचारगतादरःस्या
द्यस्यप्रसूतौनवमीनिधिश्चेत्॥९॥धर्मैकबुद्धिर्बहु
वैभवाढ्यःप्रलंबकंठोबहुशास्त्रपाठी॥उदारचित्तो
निजसंविनीतोरम्यश्चकामीदशमीभवःस्यात्॥१०॥
देवद्विजार्चाव्रतदाननीलःसुनिर्मलांतःकरणप्र
वीणः॥घृणेकचित्तोनृपतिःकचित्स्यादेकादशीजो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिरनोधिरोषः॥१११॥जनप्रियोवेव्यवहारशीलोनिजा
लयावासविलासलीलः॥सदानतोदोषिनिप्राप्तवि
त्तःस्याद्धादशी जोमनुजःप्रजावान्॥११२॥रूपान्वितः
सात्विकतावियुक्तःप्रलंबकंठश्चरणप्रसूतिः॥नरोति
शूरश्चतुरःप्रकामंत्रयोदशीयस्यतिथिःप्रसूतौ॥११३॥
क्रूरोतिशूरश्चतुरःप्रयत्नीकंदर्पलीलाकुलचित्तचेष्टः॥
स्याद्दुःसहोद्यंतविरुद्धभाषीचतुर्दशीजःपुरुषःसरो
षः॥११४॥अतिसुलक्षित्तकायोन्यायसंप्राप्तवित्तोबहु
युवतिसमेतोनित्यसंजातहर्षः॥प्रबलबलविलासो
द्यंतकारुण्यपुण्योगुणगणपरिपूर्णःपूर्णिमाजात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मा॥१५॥इतिनोभनस्त्रीपित्तमात्मभक्तः क्रैरासवि
नश्चगमागमेछः॥मान्योजनानांहतकीर्तिहर्षोदर्शो
ध्रुवःस्यात्सुरषःवृद्धागः॥१६॥इतिजातकाभरणेति
थिफलेश्वरोल्पेकरोविजयीरणाग्रेक्रयामारणःपि
नचयप्रकोपः॥शतामहोत्साहसुतोमहोजाःदिने
दिनेत्रास्यभवेन्मनुष्यः॥१७॥प्राज्ञःप्रगल्भःप्रियवाग्वि
धिज्ञःश्वन्नरेंद्राश्रयवित्तकर्त्ता॥सुखेचदुःखेचस
मस्वभावोवारेनरःक्षीतिकरस्यजातः॥१८॥वक्रोक्ति
रयंतरणप्रियःस्यान्नरेंद्रमंत्रीचतुरोपजीवी॥सत्वा
न्वितस्तोत्रनरस्वभावोदिनेभवेच्चावनिनंदनस्य॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्रूपशालीमृदुवाग्विलासःश्रीमान्कलाकौशलालता
समेतःवणिक्क्रियायांहिभवेदभिज्ञःप्राज्ञोगुणज्ञो
ऽहर्निशंद्वेषयः॥४॥विद्वान्धनीसर्वगुणोपपन्नोमनो
रमःस्यात्कुलब्धविज्ञः॥आचारवीर्यश्चजनप्रियःस्या
द्वाग्मीरोर्यस्यनरस्यजन्म॥५॥सुनीलसंकोचितकेश
पाशःप्रसन्नवेषोमतिमान्विशेषात्॥शुक्लांबरश्रीनिध
रोनरःस्यात्सन्मार्गगोभार्गववारजातः॥६॥अकालसं
जातजराप्रवृत्तिर्बलोज्झितोदुर्बलदेहयष्टिः॥तमोगु
णश्चोरुचयाभिभूतःशनेर्दिनेजातजनुर्मनुष्यः॥७॥
इतिजातकाभरणेवारफलंसदेवदेवाभ्युदितोविनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तःसत्यान्वितःप्राप्तसमस्तसंपत्॥योषाविभूषासज
भूरितोषःस्यादश्विनीजन्मनिमानवस्य॥१॥सदापकी
र्त्तिर्हिमहापवादैर्नोनाविनोदैश्चविनीतकालः॥जलानि
धीरश्चपलःखलःस्याद्प्राणिप्रणीतोभरणीषुजातः॥२॥
क्षुधाधिकःसत्वधनैर्विहीनोवृथाटनोत्पन्नमतिःकृत
घ्नः॥कठोरवाग्गर्हितकर्मकृत्स्याच्चेत्कृत्तिकाजन्मनिय
स्यजंतोः॥३॥धर्मकर्मकुशलःकृषीबलश्चास्त्रीलवि
लसत्कलेवरः॥बाल्यविलासकलितानिलायोरोहि
णीभवतियस्यजन्मभं॥४॥मृगासनाभास्वरतोनिनी
तःसदानुरक्तोगुणिनांगणेषु॥भोक्तान्यपत्नेहभरेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्णः सन्मार्गवक्तोमरगजगतिजन्मा॥५॥सुधाधिकोस्र
स्मश्मश्रुशरीरकांतिर्बंधुप्रियः कोपयुतः कृतघ्नः॥६॥प्रसूतिका
लेचभवेत्किलार्द्रदृष्टिश्चेतानभवेन्मनुष्यः॥९॥प्रभूत
मित्रः कृतशास्त्रज्ञः सद्रत्नचामीकरभूषणाढ्यः॥८॥
तापप्रतापीवसुधावसुश्चपुनर्वसुर्यस्यभवेत्प्रसूतौ॥७॥
प्रसन्नगात्रः पित्तमारुतभक्तः स्वधर्मसक्तोविनयाभियु
क्तः॥भवेन्मनुष्यः खलुपुष्यजन्मासन्माननानाधनवा
हनाढ्यः॥८॥यथाऽनलः स्यादतिदुष्टचेष्टः कष्टप्रदश्चापि
वृथाजनानां॥सार्पसदर्पोहिवृथार्थितार्थकंदर्पसंतप्त
मनामनुष्यः॥९॥कठोरचित्तः पित्तमारुतभक्तस्तीव्रः स्वभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्त्वनवद्यंविधा॥चेज्जन्मभंयस्यमघाऽनघास्यांम
तिःसदासन्निविघातदक्ष॥१०॥श्रस्त्यागीसाहसीभू
रिभर्त्रीकामान्नीपिस्याच्छिरालोनिदक्षः॥धूर्त्तःक्रूरोस्य
तसंज्ञातगर्वःपूर्वाफाल्गुन्यस्तिचेज्जन्मकाले॥११॥दा
तादयालुःसुतरांसुशीलोविख्यातकीर्तिर्नृपतिप्रधानः॥
धीरोनरोस्यंतमदुत्तरःस्याच्चेदुत्तराफाल्गुनिकाप्रसू
तौ॥१२॥दातामनस्वीसुतरांयशस्वीभूदेवदेवार्चनवत्सु
यशः॥प्रसूतिकालेकिलयस्यहस्तोहस्तोधृतान्तस्यस
मस्तसंपत्॥१३॥प्रतापसंतापितभूनृपक्षोदक्षोनयेचा
पिविचित्रयात्राः॥प्रसूतिकालेयदियस्यचित्राबुद्धिर्वि

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्रास्वलुतस्यशास्त्रे॥४॥कंदर्पेरूपःप्रभयासमेतःकां
तापरप्रीतिरतिप्रसन्नः॥स्वातीप्रसूतोयदियस्यनिश्चं
महीपतिप्रीतिविभूतियुक्तः॥५॥सदानुरक्तोग्निसुरक्रि
याधानुक्रियायामपितीव्रसौम्यः॥यस्यप्रसूतोचभवे
द्विशास्त्रास्त्रव्यसनयुक्तश्चभवेन्मनुष्यः॥६॥सक्रांतिकी
र्तिश्चनरोत्सवस्याज्ञेताद्रिपूर्णाचकलाप्रवीणः॥चेत्सं
भवेयस्यकिलानुराधासंपद्विबाधाविविधाचनस्य॥७॥
सत्कीर्तिकांतिर्विभुतासमेतोविद्वान्विनोयंतलसत्प्रताप
तापः॥श्रेष्ठःप्रविष्टोवदतांवरिष्ठोज्येष्ठोद्रुवःस्यात्पुरुषो
नितांतं॥८॥सुरेवनयुक्तोधनवाहनाढ्योहिंस्रोबलाढ्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थिरकर्मकर्त्री॥प्रतापिनारातिजनोमनुष्यान्मूलेहरंति
स्यात्जननोपपन्नः॥१९॥मूलंविरूढयवंसमूलंकुलं
हरत्येववदंतिसंतः॥चेदन्यथात्तकुरुतेविशेषात्सोभा
ग्यमायुश्चकुलाभिवृद्धिं॥२०॥ज्येष्ठांतेघटिकाचैकामू
लस्यघटिकाद्वयं॥अभुक्तमूलमित्युक्तंतत्रोत्पन्नंशि
शोर्मुखं॥२१॥अष्टवर्षाणिनालोक्यंतातेनशुभमिच्छ
तां॥तद्दोषपरिहारार्थंशांतिकंप्रोच्यतेधुना॥२२॥रत्नैः
सूतौषधीमूलैःसप्तमृद्भिःप्रपूरयेत्॥स्नानछिद्रोपरिस्थे
स्नान्निर्गतेनजलेनहि॥२३॥बालकंवापितत्स्नानेविप्रैः
संपादितेसति॥जपहोमप्रदानेचतेस्यान्मंगलंध्रुवं॥२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरूढवयवेमूलेविधिरेवंस्मनोबुधेः॥मुनिनोवच
नेसत्यंमंतव्यश्चेममीक्षुभिः॥२५॥मूलस्यपादत्रितयं
क्रमेणपितृजनस्याश्वधनस्यरिष्ं॥चतुर्थपादःशुभ
दोनिनांते

KKSU LIBRARY
RAMTEK
441 106
M-1846
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.10.20 11:03
,TRANSFERRED=2020/10/19 at 11:08:09
,PAGES=39
,TYPE=STD
,NAME=S0004150
,Book Name=M-1846-JATKABHARAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection